सान्निमध्यप्रदेशोकेल्यर्थं रचितशायनमत्यनुयातं। एवंविधं मधुमथनं सर्वेत्वयाकेली
मथनमुदारं मया सहरयेति प्रार्थितं तदपेक्ष्य यामधुदैत्योमहाबलिष्ठस्तस्यमथनकर्त्ता
रं तमनुसरेति भावः। एवं सखीवाक्यं श्रुत्वा प्रियस्यापिहृत्पं विलोकनं सर्वं प्रियप्राप्त्या
चानंदातिशयात्खेदकृतापेक्षया घनजघनस्तनगौरवमन्दगमनमूहमानां गमनमार्थे वि
चारपरां प्रतिगमनप्रकारमाह। घनजघनस्तनभारभरे इति॥ ॥घनजघनस्तनभा
रभरेणदरमंथरचरणविहारं॥ मुखरितमणिमंजीरमुपेहि विधेहि मरालविकारं। मुग्धे०॥२
॥दृढघनजघनस्तनभारभरेण घनजघनस्तनयोर्निरन्तरोयस्या हेताहशिररेषन्मंथरश्शनैः
शनैश्चरणयोर्विहारे लीलां यथा स्यात्तथोपेहि। अर्थात् प्रियं प्रतिउपसमीपे गच्छ। यद्यप्येवं
विधाय गमनमशक्यमायासजनकं तथापि गंतव्यमेव सुखपर्यवसायीलार॥ विहारोत्रम
णस्कंदे लीलायां सुरतालय इति विश्वः॥ कीदृशं। चरणविहारं। मुखरितमणिमंजीरं॥

घ

Geeta Govinda
Bhav Pradhini

मुखरितौ शब्दायमानौ मणिजटितौ नूपुरौ यस्मिन्नेतत्। कीदृशं मंजीरं। मरालनिकारं। म
रालहंसस्य निकारः परिभवो यस्मात्तत् शब्दायमानाभ्यां मणिनूपुराभ्यां हंसस्य परिभवं वि
धेहि। निकारः स्यात्परिभव इति विश्वः॥ एवमुक्तं मुखरमधीरं त्यज मंजीरमधुना मुखरि।
तमणिमंजीरमुपेहि। इत्युक्ते तत्कथं संगच्छति। अत्रायमाशयः। पूर्वं प्रियो दूरकुंजे स्थितः
स्तदा तत्र दूरगमने। धूर्त्तीस्तस्य शब्दं श्रुयादेतदभिप्रायेण त्यजेत्युक्तं। अधुना ततआगत्य
नुनयादिभिः तां प्रसाद्य समीपस्थे गतवति केलिविकुंजशय्यां तत्र निकटगमने मणिमं
जीरमुपेहीत्युक्तमिति भावः॥ किंच। प्रियं प्रतिगमनेऽन्यानि रुचिरभूषणानि रचितानि
। तथा नूपुरमपि। किंच। चरणरणितमणिनूपुरयेति एवमुक्तं वितया प्रार्थितत्वात्तयो
क्तं। एवं विरहक्लेशेनोचितं। एवं सञ्चारितान्यपन्यानि भूषणानि तानि प्रियागमने स्वयमु
त्साहेन रचितरुचिरभूषां ज्ञात्वा तन्निषिद्धकरणं नोचितं सख्या। एवं सख्योक्तं मुखरमधी

रंत्यजमंजीरंपूर्वंमुक्तमधुनाकापिराधांजगादेत्युक्तत्वात्तयामुखरितमणिमंजीरमुपैही
त्युक्तं।तत्रागत्वाकिंकर्तव्यंतत्राह॥ ॥शृणुति॥ ॥शृणुरमणीयतरंतरुणीजनमोहनं।
मदनविकारं॥कुसुमशरासनशासनबंदिनिपिकनिकरेभजभावं।मुग्धे॥२॥हेकुसुम
शरासनशासनबंदिनि॥पिकनिकरैःभावंभज।कुसुमरूपंशरासनंधनुर्यस्यतस्यशासन
कामशास्त्रोक्ताज्ञातांवंदिनिपालकेपिकानांनिकरेसमूहेयत्रावस्तछद्मानुकृतिरतिसामयि
कंकृतं।यत्त्वयाएवंप्रार्थितंकोकिलकलरवकूजितयेतितथा।एवंविधापिकनिकरेभा।
वंभजेतिभावः।यद्वा।विरहेदेवक्तोन्मिलंतिकुऊकुऊरितिकालोत्सालाःपिकानांगिर
इतिकृत्वद्वेषंत्यक्त्वापिकनीकरेभजभावंतत्रावचनंनभज॥कीदृशेपिकनिकरेकुसुमशरास
नशासनवंदिनि॥कामाज्ञास्तस्यास्तवनरूपे।वदनिवादनस्तुत्यो॥कीदृशवदशा।हेसुतल्पमा
नंत्यक्त्वाकांतंसन्नाहरूपांतरंविनामकाणादन्योरक्षकोनास्त्येवातस्तंभजंतुनोचेन्ममबा

णास्ताडयिष्यंतीतिः कुसुमशरासनमुग्धम्प्राज्ञांपालयति। तामाज्ञांपिकनिकरः॥ अभिवंद्यस्य प्रबोधिनी
वंतिच। तस्याज्ञास्तवकेबंदानिबंदीजनपिकनिकररूपेबवयोरैक्यत्वादित्यर्थः॥ मधुवन
मनुमोदनायलताततिरपित्वांप्रेरयतीत्याह॥ ॥अनिलतरलेति॥ ॥अनिलतरलकि
सलयनिकरेणकरेणलतानिकुरंबं।प्रेरणमिवकरभोरुकरोतिगतिंप्रतिमुंचविलंबं
॥मुग्धे०॥४॥ ॥हेकरभोरुकरीकरकरभवाष्ठवाच्याःप्रकोष्ठम्मूलादाकनिष्ठिकाप
र्यंतंकरभप्रदेशंकरभंवा।तद्वदूरूजंघेयस्याःहेतादृशि॥ अनिलेनतरलंचपलंयत्कि
सलयनिकरंलतापल्लवसमूहंतद्रूपेणकरेपिकोमलाकारत्वात्पल्लवतिपल्लवाअपितथा
भवंति।एवंविधेनहस्तेनकरणत्वात्लतानिकुरंबंलतासमूहोपिप्रेरणमिवजनलोकस्तत्प्रे
रणंकरोति।लतासमूहंपल्लवरूपेणकरेणवायुनाचंचलेनतत्प्रेरणंकरोतिसंज्ञांक
रोतिप्रियंप्रतियाहि।विलंबंमुंचेत्यर्थः।अचेतनापिलतासंकल्पेनापितवचेतोतद्वर्तिनी।

करंभोरुत्वात्ताकरीकरःलतोन्मूलकोभवतितदनुकूल्यंनकरोतीसात्रायः।यद्वा।यथा
स्नापितोधौतोपिकरीकरस्तेनैणकृत्वाधूलिमंगोपय्यपीक्षिपति।तथातद्वदूरुत्वादनुनयवि
नयादिभिःप्रसादितापिद्वालिरूपीषमानंचधारयसीतिभावः।एवंभावमुद्दीप्यतद्विकरा
नूवर्णयतीत्याह।।स्फुरितमनंगतरंगवशावशावदति।। ।।स्फुरितमनंगतरंगवशादिव
सूचितहरिपरिरंभं।।पृच्छमनोहरहारविमलजलधारममुंकुचकुंभमुग्धे।। ।।५।। ।।हे
सखीमद्वचनमात्मीयत्वेननमन्यसे।।तदात्मीयममुंतवकुचकुंभंमेपृच्छ।।कीदृशं।।अनंगतरं
गवशात्स्फुरिति।तत्स्फुरणंउत्प्रेक्षते।सूचितहरिपरिरंभमिव।।सूचितंहरिपरिरंभंयेन।।
तं।कुंभमित्येकवचनेननार्यावामकुचस्फुरणंप्रियसंगमसूचकमिति।।प्रसिद्धमितिभावः।।
पुनःकीदृशंमनोहरहारविमलजलधारंमनोहरोयोऽयंमुक्ताहारएवविमलजलधाराय
स्मिंस्तं।कुचकुंभोत्पाहारस्यविमलजलधारोत्पाततःस्खलितःश्रुकणभावस्योच्छलितत्वंहारवि

मलजलधारमित्यनेन ज्ञापितं।यत्र कंपो भवति तत्र जलधारापेक्षितो ऽतस्तयोस्तथात्वमि
तिभावः।माधवानुसरणे कंपादिभूषणमेवोत्सुकत्वेन वपुरपि तत्काम्यं व्यनक्तीत्याह।अधि
गतमिति॥ ॥अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जं।चंडिरसितरसनारव
डिंडिममभिसर सरसमलज्जं॥मुग्धेण॥६॥ ॥हे सखि तदेवं वपुरपि रतिरणसज्जमित्य
खिलसखीभिरधिगतं।तवेदं परिदृश्यमानं वपुरपीति निश्चितं।रतिरणाय सज्जीभू
तमिति।सर्वाभिः सखीभिर्ज्ञातं।कथं ज्ञातं यतः पूर्वैर्रचितरुचिरभूषात्वात्।योरणा
र्थं सज्जीभूतो भवति स रुचिरभूषणादिकं सूचयति।तथेदं तव वपुरपि मनः।वपुरप्यु
घतमास्ते तथापि तौ चिव्याचंडीति बोधनं रतिरणप्रवीणेवा।ततस्त्वं चंडासि।अ
भिलषिताकरणात्।अतः।अलज्जं।सरसं रसितरसनारवडिंडिममभिसर लज्जां
त्यक्त्वा।कुलस्त्रीणां लज्जात्यागो नोचितः॥निर्लज्जा च कुलांगनेफल्कलात्तत्राह॥स

रसमिति॥ ॥रतिसमयेलज्जासरसानस्यात्ततोन्यत्रसलज्जाभवेत्॥ कांचिकाचिह्नताश्या
स्तनजघनपदंपाणिनाच्छाद्यसद्यःपश्यंतीसत्रपंमामित्यत्रद्वयमुक्तंतस्मादलसंसरसंम
न्निसरा। रसितरशनावारझिंझिमं। रसितारशनारसितरशनासैववरःश्रेष्ठोझिंझिमरतिर
णोत्साहसज्जीकरणघोषवाद्यविशेषस्तंयथास्यात्तथानिपिधसंमुखसरयाहि॥ य
थारणार्थमन्निगमनेसमङ्गीभूतःशूरःडंकुत्यादिघोषंदत्वानिसरति। तथात्वमपीतिभाव
ः॥ झिंझिमस्यलोकेहुंडीत्युच्यते॥ तेनरसितरशनापदेनसशब्दासाबोध्यते॥ एवमप्युक्तं
त्रितयोक्तत्वात्। मुखरविशृंखलमेखलया। अयेपिशिशिमुखीमुखरयमणिरशनागु
णकंघनिनादमितिप्रियप्रार्थितत्वाच्चतथेत्यर्थः॥ रणरंजितस्यविलंबोनयसीत्ताकश्च
न्त्वयाविलंबःकृतस्तत्वाद्विलंबश्चेत्तदागमनप्रकारमाह॥ ॥स्मरशरसुभगनखेने।
ति॥ ॥स्मरशरसुभगनखेनसखिमवलंब्यकरेणसलीलं॥ चलवलयध्वनितैरधिबो

Geeta Govinda
Bhava Prabodhini

गीत० भाव० धयहरिमपि निजगतिशीलां॥ मुग्धे०॥ ॥७॥ ॥हे सखि करेण सखिमवलंब्य सलीलं प्रबोधिनी०
२५ यथा स्यात्तथा चल। कीदृशेन करेण। स्मरशरसुभगनखेन। कामस्य शराः कमलदलरूपा
स्ततः सुभगा नखा यस्मिंस्तेन। संयामेशरणत्रपेदृते। अत्र सुभगनखस्वरूपाण्येव कामशराणि इ
त्यर्थः। मत्तमयावलयक्वणितैर्हरिमवबोधय। सावधानं कुरु। यथा रणांगतः शूरः डंक
निघोषेण सुभटान् बोधयति तथा त्वमपि। वलयक्वणितैर्हरिमवबोधयेत्यर्थः॥ समां प्रबु
द्धः सन् प्रतिहृते तत्राह॥ कीदृशं हरिं निजगतिशीलमिति। निजागतौ तव आगमनप्राप्तौ वि
चिंतनपरं। अप्रबुद्धं तं प्रबुध्य प्रबुध्यसेत्याशयः॥ इदं श्रीजयदेवेन भणितमित्यत्राह॥ ॥श्री
जयदेवभणितमधरीकृतमिति॥ ॥श्रीजयदेवभणितमधरीकृतहारमुदासितवामं। हरि
विनिहितमनसामधितिष्ठतु कंठतटीमविरामं॥ मुग्धे०॥ ॥८॥ ॥श्रीजयदेवभणितमिदं ह २५
रिविनिहितमनसां कंठतटीं अविरामं॥ अधितिष्ठतु। हरिः विशेषेण निहितः स्थापितो मनसि

येस्ते हरिविनिहितमनसस्तेषां कंठतटीं प्रति अविरामं सवसानरहितमच्छिन्नं नाम अधिकृत्य
तिष्ठतु। कंठतटी तु हारस्तिष्ठति। तत्कथं तस्याविरमतासिद्धिस्तत्राह॥ कीदृशं भणितं। अधरी
कृतस्तुच्छीकृतो हारो येन तत्तथा। हारो मूल्यापेक्षो यन्नापेक्षं स्वरूपेणापेक्षश्चानेदमेतदपेक्षमि।
ति ततस्तुच्छीकृतो हारादिदमेव परमंभूषणमित्यर्थः॥ हारो बहिस्तिष्ठति। इदं कंठतटीमतस्ति
ष्ठतु। हारमधरीकृतश्चेद्वामानुरंजनं कथं स्या। हारो वामानुरंजनार्थं परिधीयत्ते तत्राह॥ पुन
:कीदृशं॥ उदासीनवामं उदासिता त्यक्ता वामा प्रकृष्टा रमणी या येन तत्तथा॥ जयदेव भणितश्च-
वृणां कामासिता। वामा सकाशादुदासीनो जायते। हृद्रोगमाश्वपहिनोत्यचिरेणेत्युक्तत्वात्।वा
माहि हृद्रोगोत्पादिकास्तं रोगं कायमथी जनयति। अयं तु हृद्रोगमाश्वपहिनोतीति एवं वि
धं श्रीजयदेवभणितं हरिविनिहितमनसां कंठतटीमधितिष्ठत्विति। ननु तत्राहंगता सती तस्यो
कंठान भविष्यतीत्यत्राह॥ सामांजद्यतीत्यादिना॥ सामांजहाति। रचयति स्मरकथांजत्यंगमालिं

गं॥

Geeta Govinda vallabhacharya-agrahara.org Vallabhacharya Bhav Prabodhini

गनैःप्रीतिंयास्यतिरंस्यतेमखिसमागत्येतिचिंताकुलः।सखींपश्यतिचेदितिबुद्ध्वकथयत्यानंद
तिस्विद्यतिप्रत्युद्गच्छतिमूर्छतिस्थिरतमःकुंजेनिकुंजेप्रियः॥२॥सएवमुक्तंचाद्युक्तंस्तवप्रि
यःकुंजद्वारेस्थितस्तवागमनंप्रत्यपतीत्यर्थः॥कीदृशेकुंजे॥स्थिरतमःपुंजे।स्थिरःतमोंधका
रपुंजोयाऽत्रतस्मिन्।याएतावत्कंचिरमनुनीताप्यभिमानान्नाजाहीत्सामांद्रक्ष्यतिकदाचिदी
र्ष्ययादृष्टंकिमेतावता।वक्ष्यतिस्मरकथांदृष्ट्वाकामकथांमृदुमधुरस्मितपूर्वकंकामसंबं
न्धिनींकामजनकांवार्त्तांचिदिष्यतिमृदुमधुर[illegible]चिंतयति।ततःप्रत्यंगमालिंगनैःप्रीतिं
यास्यति।अंगंअंगंप्रतीतिप्रत्यंगंप्रत्यंगमालिंगनैःतानियथा।अक्ष्णोरक्षियुगंनिधायचत
थागंडेचगंडस्थलंग्रीवायांग्रीवांनिदेश्यएवंविधृत्तांघृत्वाधरेचाधरं।विश्लिष्टंहृदयंनिधायहृद
येकामाग्निसंतापितंबाहुभ्यांचपरस्परंरुद्धगात्रौप्रत्यंगमालिंगतइति॥एवंविधैःप्रत्यंगनालिं
गनैःप्रीतिंयास्यति।रंस्यते।एवंमालिंगनैःप्रीतासतीमयासहरंस्यते।रमणंकरिष्यति।हेस

खीति चिंताकुलः सन् सखीं पश्यति। विपते त्वां दृष्ट्वा कंपते। पुलकयति। रोमांचयुक्तो जायते
आनंदति। आनंदं प्राप्नोति। खिद्यति खेदयुक्तो भवति। दृष्टमात्रेणाप्येवं सात्विकादिभावयु
क्तो भवति। न जाने स्पर्शादिना किं भविष्यति। एवंविधो मूत्वागतां दृष्ट्वाऽस्फमच्छति। सन्मु
खं गच्छति। असानंदा वक्त्राद्विवत्रो मू त्वामूच्छति। वर्त्तमानसामीप्यत्वाद्वर्त्तमानप्रयोगा
ः। स प्रियस्त्वदागमनचिंतनादेवंविधोत्कंठायुक्तो भवतीति भावः। कथमहं गच्छामि इ
तिः। पश्यंतीति विमर्शमानां प्रत्यंपश्यकाभिसारोचितवेषोपकरणमप्येतद्देवधान्यमा
हा॥ ॥अक्ष्णोर्निक्षिपदिति॥ ॥अक्ष्णोर्निक्षिपदंजनं श्रवणयोस्तापिच्छगुंजावलीमू।
र्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकं। धूर्त्तानामभिसारसाहसकृतां विषक्नि
कुंजे सखी ध्वांतं नीलनिचोलचारु सदृशां प्रत्यंगमालिंगति॥२॥ ॥हे सखि विषक्निकुं
जे ध्वांतं सुदृशां प्रत्यंगमालिंगति। प्रियाया अभिसारानुकूलेन तमः सन्मुखागतसुदृशा

मुत्तमदृष्टीनां प्रत्यंगं सर्वत्रांगे आलिगति कीदृशं ध्वांतं नीलनिचोलचारु नीलनिचोलादतिचा
रु यथा नीलनिचोलं प्रत्यंगमाहृत्य तिष्ठति। तथेदमपि ध्वांतं प्रत्यंगमालिंगतीत्यर्थः। कीदृशीनां
सुदृशां ध्वस्तानामभिसारसत्वरहृदां ध्वस्तानामभिसारात्सत्वरं हृत् यासां ताः तासां ध्वस्ताः परद्रो·
हचिंतकाः ते परद्रोहार्थं ध्वांते बहिर्निःसरंति काचिदभिसारार्थं गच्छति तस्याति बंधकारणार्थं ते
षां विघ्नाय सत्वरहृदयवृत्ता। कदाचिद्धूर्ताः सन्मुखमायास्यंति ततः सत्वरं शीघ्रगमने मनो
यासां तथाविधानां सुदृशां नीलनिचोलचारु ध्वांतं प्रत्यंगमालिंगति। सुदृशामिति बहुवचने
न सखिभिः सहगमनात्। भगवंतं प्रियं प्रति गमनोद्यतत्वात् सुष्ठु सुदृशो यासां तासां। तेन सत्व
रगमने प्रत्येकं नीलनिचोलपरिधानस्थितौ विलंबो भवेत् तन्मा भूदित्यभिप्रायेण नीलनिचो
लस्थानीयं सर्वासां ध्वांतमित्यर्थः॥ अंधकाराभिसारोचितशृंगारादिकमाह अक्ष्णोर्निक्षि
पदंजनं। किं कुर्वन् नेत्रयोरंजनं निक्षिपत्। ज्ञानात्मकं यो नेत्रयोरंजननिक्षिपेण तत्र गम

नेभ्यस्त्रीनांज्ञानमावरणमितिभावः।सर्वेषांज्ञानानामाधिदैविकरूपेतस्यात्राक्ष्णीणिभग
वदवलोकितत्वात्।श्रवणयोस्तापिच्छगुच्छावलीं।तमालस्तबकश्रेणीं॥मूर्ध्निश्यामसरोज
दामनीलकमलमाला।कुचयोःकस्तूरिकापत्रकंनीलकमलमालाङ्कद्वयकंवधारणंत्य
क्तामूर्ध्निधारणेतथाकुचयोःकस्तूरिकापत्रंनिषतंसरसंमार्गगमनायासस्वेदाम्बुश्यामस
रोजदाम्नामार्जितंभिन्नंचेत्प्रियप्रतिगमनेयथास्थितंतथैवतस्यविनियोगार्थंतथाकरणमिति
भावः।श्लोकः।नन्वेतत्करणार्थेस्थितौविलंबः।किंनस्याद्यथा।नीलनिचोलपरिधानेविलंबश्चो
क्तस्तत्राह।रचितरुचिरभूषाभियुक्तत्वात्तत्सर्वंपूर्वमेवसंपादितंस्थितमितिभावः।अतए
वांजनादिकंनिक्षिपदित्युक्तं।एवंविधांधकारगमनेभिसारिकाणां।सोनाविशेषमाह॥
काश्मीरगौरवपुषामिति॥ ॥काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितोरुचि
मंजरीभिः॥एतत्तमालदलनीलतमंतमिस्रंतत्प्रेमहेमनिकषोपलतांतनोति॥२॥ ॥एत

त्तमिस्रंकाश्मीरगौरवपुषामभिसारिकाणांरुचिमंजरीभितःआबद्धरेखंसत्तत्प्रेमहे
मनिकषोपलतांतनोति।परिदृश्यमाणंएतत्तमिस्रमंधकारः।काश्मीरःकुंकुमस्तस्मा
द्गौरंवपुर्यासांतासामभिसारिकाणांप्रियंप्रतिगमनकर्त्रीणांरुचिःकांतिस्तद्रूपामंजरीभि
ःछटाभिरभितःसर्वतस्ततमिस्रंतासांप्रेमस्नेहातिशयरूपहेम्नःआबद्धरेखायस्मिन्ने
वंविधंनिरूपमनिकषोपलंसुवर्णशुद्धिज्ञापकंश्यामपाषाणरूपतांविस्तारयति।यथा
सुवर्णशुद्धिज्ञापकेश्यामपाषाणेसुवर्णस्यरेखातथैवंविधांधकारेकाश्मीरगौरव
पुषामभिसारिकाणांरुचिमंजरीरूपाहेम्नःआबद्धरेखंयथास्यात्तथातमिस्रंशोभते।
न ।कीदृशंमिस्रं।तमालदलतःसकाशादतिनीलंनीलतमं।यद्वा।तमालवनांतःस्थितत्वं
जत्वात्सतोनीलतममिति।भावः।एतेनांधकारनिविडत्वंज्ञापितं।एतादृशेंधकारेग
मनेविलंबोनकार्यः।नह्यस्तैःकोपिश्यपतितितोयजातंतदाहाहारावलीति॥ ॥हारा

वलीतरलकांचनकांचिदाममंजीरकंकणमणिद्युतिदीपितस्य। द्वारेनिकुंजनिलयस्यहरिंनि
रीक्ष्यव्रीडावतीमथसखीनिजगादराधां॥४॥एवंप्रबोधिताश्रीराधासख्यासहहरिसंस्थितकुं।
जद्वारेगत्वास्थिताहरिरप्युत्सुकःसन्तस्यागमनप्रतीक्ष्यमाणःकुंजद्वारेस्थितस्तदातंविलोक्य
ज्जयालज्जाब्धौमज्जमानांश्रीराधांप्रतिसखीप्राह।हारावलीति।अस्यानंतरंतत्रगमनानंतरं·
निकुंजनिलयस्यद्वारेहरिंनिरीक्ष्यव्रीडावतींराधांसखीनिजगाद।ननुपूर्वोक्तांधकारेनि
कुंजनिलयस्यगृहस्यद्वारेहरेःस्थितस्यावलोकनंकथंजातमित्यत्राह।कीदृशस्यनि
लयस्य।हारावलीतरलकांचनकांचिदाममंजीरकंकणमणिद्युतिदीपितस्य।हाराव
लेस्तरलमध्यगतानांमणीनांकनककटिमेखलादाम्नः।मध्यगतानांचनूपुरयोर्मध्यग।
तानांचकंकणयोर्मध्यगतानांचमणीनांकांतिभिःप्रकाशितस्यप्रकाशयुक्तस्यतरलो·
हारमध्यगइत्यमरः॥निकुंजस्यनिलयस्यपदोक्त्याक्रीडोपयोगिकसकलसमृद्धियु

Geet Govinda
Bhav Prabodhini

Pandit Shri Gattulalji Research Centre

स्येतिशापितं।नोचेदयेकुरुयदुनंदनचंदनशिशिरतरेणकरेणपयोधरे।मृगमदपत्रमितया
दिवक्ष्यमाणप्रियाप्रार्थितकरणं अतःस्यादतस्तथोक्तमितिभावः॥एवंविधस्यनिकुंजनिल
यस्यद्वारेहरिंविलोक्यव्रीडावतींराधांप्रतिसखीजगाद।किंजगादतदाह॥ ॥मंजुतरकुंजत
लेति॥ ॥वैराडीरागेणगीयते॥ ॥मंजुतरकुंजतलकेलिसदने।प्रविशराधेमाधवसमीपमि
हविलसरतिरभसहसितवदने॥प्रविशराधेमाधवसमीपं॥१॥हेराधेमंजुतरकुंजतल
केलिसदनेमाधवसमीपं।प्रविश।राधेसंबोधनंस्वयमंपूर्वंराधेगृहंप्रापयतथाधुनापिरा
धेमाधवसमीपंप्रविशेत्युक्तं।ततोराधामाधवयोर्यमुनाकूलेकेलयः।कृतातांस्तथामंजुत
रमतिशयेनसुंदरमंजुतरंएवंविधंयत्कुंजतलसदनंतस्मिन्प्रविश।सदनपदेनयथा
सर्वक्रीडैकनिलयंतथाविधंसदनपदं।तत्रप्रविष्टासतिकिंकरोमीत्यत्राह।रतिरभस
हसितवदनेरत्युत्सुकतयाहसितंवदनंयस्याःहेतादृशि।तवोच्छलितंमनोत्सुकतया

२

Geeta Govinda
Bhava Prabodhini

हासमिषेण प्रियमिलनाय बहिर्निर्गतमिति भावः॥ तत्र प्रविष्टासती विलसविलासं कुरु॥
नाहं रतिरभसतया हसितवदनास्मि अस्य तव नागरस्य वैकल्यमाकलय्य हसितवदनमित्या
ह॥ नवभवदशोकेति॥ हे कुचकलशयोः कंपनेन तरलो चंचलो हारो यस्याः हे तादृशि॥ कु
चकलशयोः कंपनाभावाद्धारस्य तरलता न स्यात्॥ अतः कुचकलशकंपेनात्तरलवृत्तिर्व्यक्ता॥
बोधितातोवागमय तां त्यक्त्वा केलिसदने प्रविशाक्रीडेति नवभवदशोकदलशयनसारे॥ न
वभवदशोकदलशयनसारे॥ प्रविश राधे माधवसमीपमिह विलस कुचकलशतरलहा
रे॥ प्रविशपण॥ ॥१॥ ॥नवोभवतीति नवभवत्॥ शोकनाशके रशोकदलैर्योऽरचितशय
नसारं शयने सारं सुखप्रदं श्रेष्ठं तस्मिन् प्रविशेति भावः॥ नायातः सखि निर्दयोऽकृत्वा॥
त्वदाकारितापि नायातः अतः एवंविधस्य निर्दयस्य निजाय विशेषावकलनात्कंपोयमि
त्यत्राह॥ कुसुमचयेति॥ ॥कुसुमचयरचितशुचिवासगेहे प्रविश राधे माधवसमीप

मिदविलसकुसुमसुकुमारदेहे।प्रविशप०॥२॥ ॥कुसुमचयैरचितंशुचिवासगेहंयस्मि
स्तस्मिन्केलिसदनेप्रविशनानावर्णैःकुसुमसमूहैःरचितंशुचिःशृंगाररसःशृंगारः
शुचिरुज्ज्वलइत्यमरोक्तत्वात्ससंयोगविप्रयोगात्मकस्तस्यवासाधिष्ठानरूपंनायका
शारीरासकलनायकाशिरोमणिरूपंशारीरंरचितंतवशरीराकृतिरूपारचनास्त
नासि।कीदृशी।चंपकैःस्वर्णयूथीभिर्वकुलकुरबकैःकृतंनीलनलिनयोर्नेत्रेतिल
पुष्पेणनासिका॥२॥ ॥बंधूकैरधरःकुंदकलिकाभिरदावली।वक्षोजौभ्रमरालीढसु
ष्टुपंकजकोशयोः।कबरीहल्लककमलैःकरपादतलैतदंथा।कृतेनेकिशलयैःरक्तैःरचि
तंकुसुमोत्करैःशुचिवासगृहंतस्मिन्समीपंमाधवस्यवै।विलालासंकेलिसदनेप्रवि
शपकुसुमधीको।एवंविधंशुचिवासगेहंकथंरचितमित्यत्राह।कीदृशीहे।राधेकुसु
मसुकुमारदेहे।कुसुमेभ्यःसुकुमारोदेहोयस्याःहेतादृशी।एवंविधांत्वांकेलिसदन

Geeta Govinda
Bhava Prabodhini

मेवंविधंरचितं।सर्वेकृतांरांकांसक्तावाम्यंनकुर्वितिभावः।नाहंवाम्यंकरोमि।एता
वदागमनाकुलात्तस्मिन्खेदयुक्तत्वात्पवनार्थेस्थितेतत्राह।चलमलयपवनेति।च
लमलयवनपवनसुरभिशीते।प्रविश्यराधेमाधवसमीपमिहविलसमदनशरनिक
रनीलोअविश्रपणा॥४॥ ॥अथोद्दीपनायातिशयेनकेलिसदनमेववर्णयति।कीदृशे।
चलमलयपवनसुरभिशीतलेचलेनमलयपवनेनसुरभिशीतंचतस्मिन्।चलमलयप
वनान्मंदःसुरभिःशीतश्चेतित्रिधोक्तःपवनोयत्रवर्त्तते।तस्मिन्केलिसदनेनमाधवस
मीपंप्रविश।हेरतिवलितललितगीते।रतिवलितंरत्युत्पादकं।यस्या।रतौवलितंर
तियोग्यं।ललितंमनोहरंगीतंयस्याःहेतादृशि।एवंविधंगीतमुक्त्वासतीइहास्मिन्के
लिसदनेविलसगीतमनंगगर्वकत्वात्॥नन्वेवंविधंगानंकथंकुर्यांकोपिदृष्टः।शृणुया
तइत्यत्राह॥पुनःकीदृशे॥मधुमुदितमधुपकुलकलितरावे।प्रविशराधेमाधवसमी

Geeta Govinda
Bhava Prabodhini

पविलसकुसुमशरसरसभावे॥ प्रविश०॥ ॥५॥ ॥मधुमुदितमधुपकुलकलितरावे
मधुनामकरंदेनमुदितेनमधुपकुलेनकलितःविहितःशब्दोयस्मिन्तन्मधुपकुलक
लितरावयुक्तंतवमंदमधुरगीतस्यमिलनंजातंदृष्ट्वामौनंनभविष्यतीतिभावः॥ केलिसद
नेएतादृशेमाधवसमीपंप्रविशहेमदनरससरसभावे।कामरसेनवाकामेनशृंगार
रसेनसरसभावोयस्याःहेतादृशिइहविलसाइदंविधायास्तवप्रियनिकटप्रवेशएवो
चितइतिभावः।मध्यतारगानेछाचेत्तथापिकुलानांश्रवणेनभविष्यतीतत्राह॥ कीदृशे
मधुरतरपिकनिकरनिनदमुखरे। ॥मधुरतरपिकनिकरनिनदमुखरे।प्रविश
राधेमाधवसमीपमिहविलसदशनरुचिरुचिरशिखरे।प्रविश०॥ ॥अतिशयेनम
धुरैःकोकिलशब्दैनसमूहशब्दैमुखरेशब्दिते।एवंविधशब्दैःसहमिलितंतवगीतं
नपृथक्ज्ञातंनभविष्यति।अतोहेदशनरुचिरुचिरशिखरे।दशनारूपाःकांतियुक्ताः

रुचिरामनोहराःशिखरामाणिक्यविशेषायस्यांहेतादृशि।पक्वदाडिमबीजानंमाणिक्यं
शिखरंविदुरिति।इहकांतिद्युरूपाद्दशनाइत्यर्थः।इहकुंददशनायास्तवक्रियाविशेष
रूपमेवयोगपलेलिभावः।नन्वेवंविधदशनस्याचक्षवोक्तंहारावलीतरलकांचनकांचि
दाममंजीरकेकरणमणिद्युतिदीपितनिकुंजनिलयेप्रतिरूपविलासकोपिहस्यतीत्य
त्राह।।कीदृशे।।विततबहुवल्लीनवपल्लवघने।।विततबहुवल्लीनांनवपल्लवैर्घनेसी
म्निविपिनकेलिसदनेमाधवसमीपंस्थिरा।दिचिरमलसपीनजघने।अलसंचपीनंच
जघनंयस्याःहेतादृशिचिरंचिरकालंयथास्यात्तथाअलसंखरारहितंपीनंघनंएवंवि
धासतीचिरंचिरकालंकुंजदर्शनेनयंत्यक्त्वाविलसेतिभावःसूचितः।।एवंश्रीराधांप्र
बोध्यमुरारिंप्रबोधयतीत्याह।। ।।विहितपद्मावतीसुखसमाजे।। ।।विहितप
द्मावतीसुखसमाजे।।कुरुमुरारेमंगलशतानिभणतिजयदेवकविराजराजे।। ।।८।।

हेमुरारेविहितःपद्मावत्याःश्रीराधायाःआगमनरूपेसमाजेसुखजनकेसमाजेमंग
लशतानिकुरु।मुरोहत्रासुरसहामाहामायावीदैत्यस्यारिस्त्वंनाशयित्वाषोडशसह
स्रकन्यारत्नप्राप्तिसमाजेतथामंगलानिजातानिनत्वविघ्नंतिचेत्याशयेनमुरारेसंबो·
धनं।तदात्वतत्रगतस्यतासांप्राप्तिर्जाता।अत्रपद्मावत्यास्त्वमागत्यसमाजोविहितस्त
स्मान्मंगलशतान्यसंख्यानिकुर्वितिभावः॥यद्वा।कंसारेविहितपद्मावतीसुखसमाजेस
ति॥यापद्मावतीत्वविरहेहरिरिति॥हरिरितिवदतिसकामंविरहविहितमरणेवनिका
मं।एतावत्पतनुज्ज्वरेवरतनुर्जीवितेतित्वांप्रत्युक्तं॥त्वामेवमेकंप्रियंध्यायंतीरहसिस्थि
ताकथमपिक्षीणाक्षणंप्राणीति।जीवतिपरमिदंतवरतिकलयाममममरणमेववरमिति
बाधांविधेहिमलयानिलपंचबाणप्राणान्गृहाणेतिस्वयंप्रार्थयती।हिमातमपिदह
तिशिशिरमयूखपेमरणमनुकरोति॥किंजनेनधनेनकिंममजीवितेनसुखेनेत्यादिना

स्याविरहेकथयन्स्थितस्ततोद्वयोःसुखसमाजःॐतत्रासीदेवंविधःसुखसमाजःपद्मा
वत्याःश्रीराधायाविदितस्तस्मिन्सतिमंगलशतान्येवकरणीयानिसुरतःॐस्मुरारेमंग
लशतानिप्रोक्तवानित्याशयः॥एवंकविराजराजेजयदेवेसखीनांवंप्राक्षेमणेतिसतिमंगलश
तानिऊर्वित्यर्थः॥सर्वोत्कृष्टसर्वेश्वरयोनिजोपासेष्टदेवतयोःसुषसमाजंनणितवलास्तदा
वेत्रादात्मानंबहुमन्यमानस्यस्वस्यकविराजराजत्वमुक्तमितिप्रौढोक्तिरित्यर्थः॥एवं
सखीवाक्यंश्रुत्वाप्रसादयुक्तामालक्ष्यसखिश्रीराधांप्रतिसकौतुकसनर्मवाक्यमाह॥
त्वांचित्तेनवहन्निति॥ ॥त्वांचित्तेनचिरंवहन्नयमतिश्रांतोभृशंतापितःकंदर्पेणचपातु
मिछतिसुधासंबाधंबिंबाधरंअस्यांकंतदलंकुरुक्षणमिहभ्रूक्षेपलक्ष्मीलवक्रीते
दासइवोपसेवितपदांभोजेकुतःसंभ्रमः॥२॥ ॥हेसखिअयंश्रीकृष्णःत्वांचित्तेनवह
न्नतिश्रांतः॥घनस्तनजघनभारगुरुत्वयाक्रांतत्वादितिभावः॥त्वयाघनस्तनजघना।

Geeta Govinda
Bhava Prabodhini

यात्रांते स्थांत इत्युक्तत्वात्। चपरं कंदर्पेण त्वत्र शमत्यर्थं तापितः॥ अतः श्रमेण तापेन च पि
पासितः सन् सुधायाः संबाधो यस्मादेवं विधं बिंबाधरं पातुमिच्छति। यस्य बिंबाधरस्याग्रे
सुधा संबाधिता न वर्तते तद्बिंबाधरस्यानयप्रकारमाह॥ अस्यां कमिति॥ तस्मादिहास्मिन्नङ्कं
जे अस्य श्रीकृष्णस्यांगमुत्संगं कृत्वा यावत्पर्यंतं बिंबाधरपानं कुर्यां तावत्कृष्णं अलंकरो।
मनं कुरु॥ अस्यां कं त्वया शोभितं नविष्यतीति भावः॥ अंतःस्थितायाः सुधाया बहिःस्थित
स्य पानानुपपत्तित्वात् कृष्णमलं कुर्वितर्थः॥ अविदिताभिप्रायस्यां कोपवेशाने मन्मथः।
संकुचत्यत्राह॥ अनुरूपेति॥ अहे पलक्ष्मीलवक्रीते दास इवोपसेवितपदांभोजे कुतः संभ्र
मः॥ अंबोः सन्मुखं हे प्रियाननं स एव लक्ष्मीलवः समृद्धिस्तेन क्रीते कुतः संकोचः॥ का। ग॰
न्निवकासे रेवा यथा लक्ष्मीलवेन स्वल्पद्रव्यमूल्येनानीते दासे संभ्रमो न कार्यस्तथात्र हे
पलक्ष्मीलवक्रीते चास्मिन्कुतः संभ्रम इति भावः॥ क्रीते दास इवात्मेरेहुमाह॥ कीदृशे। उपसे

वितपदांभोजे ज्ञप समीपे सेवितपदांभोजे येन तस्मिन् । क्रीतस्यैव सेवोपयोगादिकं युक्तमित्य
र्थः ॥ एवंविधस्यांके रूपणं मलेऽऊर्द्धीत्यर्थः ॥ इति सखीवचनाउच्चलितचित्ता कुंजं विवेशेत्याह ॥ सा
ससाध्वससानंदमिति ॥ ॥ सा ससाध्वससानंदे गोविंदे लोललोचना ॥ सिंजानमंजुमंजीरं प्रवि
वेशनं ॥१॥ ॥ सा ससाध्वससानंदं सिंजानमंजुमंजीरं यथा स्यात्तथा निवेशनं विवेश निकेत
नं वा पाव ॥ सख्या प्रेरिता सा साध्वसेन सहवर्त्तमानं चानंदेन सहवर्त्तमानं ससाध्वससानंदं स
साध्वसं भयं तेन सहवर्त्तमानं आनंदेन सहवर्त्तमानं यथा स्यात्तथा कुंजसदनं प्रविवेश ॥ प्र
त्यहं नूतनतरत्वात् प्रथमसमागमत्वात् तज्जयं विद्युक्तप्राप्तत्वादानंदमिति भावः ॥ सिंजानं श
ब्दायमानं मंजु मनोहरं नूपुरं अत्रापि क्रियाविशेषणं ॥ कीदृशी ॥ कीदृशी ॥ गोविंदे लोललोचना
॥ गोविंदे स्वस्पं जेऽत एव लोले सतृष्णे लोचने अलोचनपरे यस्याः सा ॥ एवं कुंजप्रवेशमुक्त्वा त
स्यादर्शनेन च श्रीकृष्णस्य तद्दर्शनानंदविकारयुक्तं स्वरूपमाह ॥ राधावलोकनेत्यादिना ॥

देशीयवेराडीरागेणगीयते॥ ॥राधावदनवलोकनविकसितविविधविकारविभंगं।ज
लनिधिमिवविधुमंडलदर्शनतरलिततुंगतरंगं॥हरिमेकरसंचिरमभिलषितविलासं
साददर्शगुरुहर्षवशंवदवदनमनंगविकारं॥ ॥१॥ ॥साहरिंददर्शसाराधायाकुंजनि
केतनेप्रविवेश।साहरिंसकलदुःखहर्त्तारंहरिंददर्श।कीदृशं।एकरसं।एकस्यांश्रीराधा
यामेवरसःशृंगाररसोयस्यतं।अस्यायमर्थः।शृंगाररसोद्विविधःसंयोगविप्रयोगा
त्मकश्चासरसःश्रीराधायामेवसंयोगःश्रीराधायांविप्रयोगस्तस्यएव।नोचेद्राधामाधव
यहृदयेव्रजसुंदरी॥कथंतत्याज॥तासांत्यागात्तद्विरहरसानुभवकरणादे[illegible]स्या
एवविरहरसस्यानुभवः॥इतोनान्याःमामियंचलिताविलोक्येत्याद्याःस्पष्टातनील
निचोलमित्यंतपर्यंतमितिस्वस्मिन्सर्वोत्कृष्टत्वनिश्चयेनैकपरत्वमेवंविधमेकरसंद
दर्श।यथा।द्विदलात्मकरसत्वादेकसंयोगरसःस्वस्मिन्नितिएकरसमितिभावः॥सर्वोन्पी

गना।निरमणाकरणात्कथंतदेकरसमित्याह॥पुनः कीदृशं।चिरमनिलिखितविलासं।चि
रंसर्वत्रिस्फुरन्मनोहारिविलासजालसमिफरूत्वा।चिरकालमनिलिखितो वांछितो विला
सोयेनतं।यद्वा।बलवयोधिनलेद्दत्वास्यपीतःपीतांबरोपितथाकरोदिसादिपर्यंतंचि
रकालमनिलिखितंतथाविलासोयस्यतं।तासुयद्रमणंराधायास्तत्संप्रज्ञानार्थेनतुर
स्तोगार्थमितिभावः॥पुनः॥कीण॥उरुहर्षवशंवदवदनं।अतएवउरुस्महान्योहर्षस्त।
द्विसंवादीवदनंयस्यतं।पुनः।अनंगविलासं।अतएवकामस्यविलासोयस्मिंस्तं।वदनवि
शेषणं।पुनः।राधावदनविलोकनमिति।राधावदनविलोकनेनैवविकसिताउदयंप्रा
प्तानानाविधास्संकस्वेदादयःसात्विकाविकाराः।मानसोभावास्तेषांविभंगाविशिष्ट।
तरंगायस्मिंस्तं।तदेकनिष्ठत्वमेवदृष्टांतेनस्पष्टयति।कमिव।जलनिधिमिव।कीदृशंज
लनिधिं।विधुमंडलदर्शनतरलितुंगतरंगं।विधुमंडलदर्शनेनैवचंचलोन्नतस्तुंगास्तरं

गाउच्छलितामहोर्मयोयस्मिंस्तं।समुद्रपक्षेतुउद्दंडारत्नानिप्रकटितानि।तथापिसमुद्रःस्मरो
विधुमंडलदर्शनादेवतरलितानंगतरंगोभवतितथासर्वाःव्रजसुंदर्यःसंत्यपिश्रीराधा
वदनविधुमंडलविलोकनादेवरससमुद्रश्रीकृष्णस्यतरलिताःस्वैकाविविधविका
गा रस्वरूपास्तरंगाबभूवुः।श्रीकृष्णसमुद्रसाम्यंविविधाविकारास्तरंगाःराधावदनंविधु
ः।यत्रसमुद्रस्तत्रयमुनादयोनद्योमिलिताभवंतीतितमाहाकीदृशं।। ।।हारममला
तरतारमिति।। ।।हारममलतरतारमुरसिदधनंपरिलंब्यविदूरं।स्फुटतरफेनकदं
बकरंबितमिवयमुनाजलपूरंहरिमेकरसं।।११।। ।।उरसिविदूरंपरिलंब्यहारंदधतंकी
दृशंहारं।अमलतरतारं।अच्छास्तरलतारामुक्तायस्मिंस्तं।कमिव।यमुनाजलपूरमि
वाकीदृशंहारं।स्फुटतरफेनकदंबकरंबितंस्फुटतरफेनसमूहेनयुक्तं।यथाति
श्रायप्रकफेनसमूहयुक्तंयमुनाजलपूरंतथामलतरतारहारं।यमुनाजलस्व

नं श्रीकृष्णवक्षः मुक्ताश्रग्वैचनारस्यादिति विश्वः। कीदृशो हरिः। श्यामलमृडुलकलेवरमंडलं॥ ॥श्यामलमृडुलकलेवरमंडलमधिगतगौरडुकूलं। नीलनलिनमिवपीतपरागपटलभरवलयितमूलं॥ हरिमेण॥३॥ ॥यावंतिश्यामानितानिलातिश्रीदत्तोतच्छ्यामलं। सजलजलदमलिनिधिनीलकमलातसीकुसुममरकततमालयमुनाजलशरदलितांजनादीनिश्यामानियावंतीमृडुनिनवनीतादीनितानिचिक्कणानीति मृडुलं श्यामलं च मृडुलं च श्यामलमृडुलं कलेवरं मंडलं यस्पतं। शरीरदेहादिपदं त्यक्त्वा कलेवरोक्त्या कलाभक्तमधुराणि यावंति तानिद्विषत्तएवंविधं वरं श्रेष्ठं मंडलं तत्कलेवरमंडलं। शरीरादिदेहाध्यासादिवयस्तरुणादिधर्मैरदिनत्वोक्तलेवरं। मंडलपदेन यथोचितावयवसंनिवेशानिर्वचनीयरूपत्वा। यद्वेति श्यामलमृडुलानि तेषाममस्कृमधुरतायाद्भुणागतौ। ज्ञातिंप्राप्ति। स्ततोवरमंडलं। मंडलपदोक्त्या यथामलांतःस्थितं सूर्यचंद्रादिस्वरूपमव्यक्तं तेजोरा।

ङ्घ्रिस्वरूपं मंडलपदद्वाभ्यां तथा चेदं श्यामलमृदुलकलेवरमंडलमिति भावः। यद्वा। यथाभि
मतां ततः पाति वस्त्वन्यत्र न गच्छतीति तथा श्यामलमृदुलकमधुराणि अत्र गतानि वरत्वादेत-
मंडलं प्राप्यान्यत्र वसंतीति भावः सूचितः। तस्मिन्नधि[illegible]गतं प्राप्तं गौरं पीतं दुकूलं यस्मिंस्तत्॥
पीतो गौरो हरिद्राभ इत्यमरः॥ पूर्वं प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं राधायाश्च
कितं तदधुनाधिगतपीतदुकूलपदोक्त्या राधायाः सकाशादधिगतपदेन प्राप्तमित्युक्तं लात्।
सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवती कृतवेषे केशवे तथाधिगतं नीलनिचोलं राध
यैत्यर्थः॥ कमिव। नीलनलिनमिव। कीदृशं नीलनलिनं पीतपरागाणां समूहातिशयेन वे-
ष्टितं मूलं येन वलितं तथा श्यामलमृदुलकलेवरमंडलेपि नवदुकूलमित्यर्थः॥ [illegible]स्तु नलि
नानि गतेन वर्तिनं मूलवलितः। यथा भगवता परिधत्तं पीतांबरं पादमूलपर्यंतमांदोलितं
प्रपदांदोलितांचलं दुकूलत्वात्तथा नीलनलिनं पीतपरागपटलभरत्वान्मूलपर्यंतवल-

यितमित्युक्तं। यद्वा। परागपटलम्राहृत्वा न्मूलोक्तं त्रकृतोपमेयं वा। पुनः किं तरलदृगं
चलचंचलमनोमनोहरवदनजनितरतिरागं। स्फुटकमलोदरखेलितखंजनयुगमिवश
रदितडागं॥ध्रु॥टी०॥ तरलं यद्दृगंचलं तस्य वलनेन मनोहरं यद्वदनं तेन जनितः रतिरा
गो येन तं। चंचलदृष्ट्यावलोकनपूर्वकवदनेन श्रीराधायां रतिः स्नेहातिशयो जनित इति
भावः। कमिव। शारदितडागमिव। कीदृशं तडागं। स्फुटकमलोदरखेलितखंजनयुगं।
स्फुटं विकासितं यत्कमलं तस्योदरे खेलितं क्रीडापरं खंजनयुगं यस्मिंस्तत्। विकसितक
मलमध्ये क्रीडापरं खंजनयुगं तडागे। तथा श्रीकृष्णे तरलदृगंचलयुगं। मनोहरवदनमि
त्यर्थः॥ श्रीकृष्णस्य तडागेन साम्यं रतिरागजनितस्य वदनस्य विकसितकमलेन नयन
योः खंजनयुगेन साम्यं॥ ॥पुनः किं वदनकमलपरिशीलनमीलितमिहरसमकुंडल
शोभं॥ वदनकमलपरिशीलनमिलितमिहरसमकुंडलशोभं॥ स्मितरुचिरुचि

रसमुल्लसिताधरपल्लवकल्पितरतिलोभं॥हरिणा५॥ ॥पूर्वैविकसितकमलवदनमुकुलावि
काशाःसूर्यापेक्षत्वात्तदर्पयति॥वदनकमलोपरिशीलनमितप्रकाशामिहमुकुलयोर्मिह
रसूर्यसमयोःकुंडलयोःशोभायस्मात्तं॥जगतिसर्वत्रस्थितानांबहूनांकलानांरविर्दि
रतएकप्रकाशयति।अत्रभगवतोवदनकमलस्यालौकिकस्यहृद्गस्थितेनलौकिकेने।
केनरविणाप्रकाशोनभवेदतकोटिसूर्यप्रकाशाद्युतोयमेवातोलौकिकौसूर्यौकुंडल
रूपौदृष्ट्वागोप्यस्थिताविति॥मिहरपदमितिविद्वांसः॥मिहरारुणपूषणइत्यमरः॥पुनः॥
किं।स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभं।स्मितरुच्याकृत्वारुचिर
ःसम्यगुल्लसितोयोधरपल्लवस्तेनकृतःरतिलोभोयस्यतं।स्मितरुचिकुसुमेतिपा
ठे।अधरस्यपल्लवोत्पायत्रपल्लवस्तत्रकुसुमंतदनंतरंफलं।अस्मिन्नधरपल्लवेरु
चिरेवकुसुमंतदनंतरंरतिलोभरूपंफलंतेनविष्पतितिभावः।पुनः।किं।त्रिलोकिकिरण

छुरितोदरजलधरसुंदरसुकुसुमकेशं॥५॥ ॥शिशिरकिरणछुरितोदरजलधरसुंदरसु
कुसुमसुकेशं। तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं॥हरिणा६॥ ॥शिशि
किरणैः छुरितं वा सुंदरमध्यं यस्य जलधरस्य तस्येव सुंदरकुसुमैः सह सुष्टु शोभनना के
शा यस्य तं। यथा शिशिरकिरणैः छुरितं जलधरस्य मध्यं तथा सुंदरकुसुमैः सह केशास्त
द्वद्मिश्रमित्यर्थः। केशानां जधरेण साम्यं कुसुमानां शिशिरकिरणैः साम्यं पुनः किं। तिमि
रोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं। एवं सुकुसुमकेशानां शिशिरकिरणछु
रितोदरजलधरत्वमुक्तं। यत्र किरणाः सत्त्रेवं इंद्रस्यपेत्वलात्तिमिरे उदितं यद्विधुमंडलं त
द्वन्निर्मलं मलयचंदनस्यअर्थाल्ललाटे निवेशो यस्य तं। यथा तिमिरे उदितं विधुमंड
लं तथा ललाटे चंदनतिलकस्यपंडत्वं। तिलकस्य विधुमंडलोत्पादाकृणालेमंडलाकारं ग
ध्यात्तं तिलकं क्रियते जयदेवस्य तज्जातीयत्वात्तथाविधं वर्णयतीत्याशयः। एवं त्रिगव

तोज्ज्वल [illegible] निधिमिवोक्तं ततो यमुनापूरमिव ततो नीलनलिनमिव ततः शारदितमागमि।
व ततो जलधरस्ततस्तिमिरत्वं। एभिः प्रकारैः श्रीकृष्णस्योपमेयो कृत्वादनिर्वचनीयत्वमुक्तं। य
द्वा यथान्न पाप्यानिरुपाधि तस्य बकन्नपेक्षा तत्साम्योत्कर्षेजाते ततोन्यूनमपेक्षते ततो नाना
विधेवातस्येयं श्रीराधायाः पूर्वं दर्शनाभावादत्यार्त्या दृष्टत्वात् ज्ञानेनविधिमिव तया दृष्टस्त
तो यमुनापूरमिव ततो नानारूप इति भावः॥ [illegible] विपुलपुलकभरदंतुरितं॥ वि
पुलपुलकभरदंतुरितं रतिकेलिकलाभिरधीरं। मणिगणकिरणसमूहसमुज्ज्वलभू
षणसुभगशरीरं। हरि॥१॥ रतिकेलिकलाभिरधीरं विशेषणद्वयं पूर्वं विविधविकारभं
गमित्युक्तत्वात्सात्विकाविर्भावविकाराद्विपुलातिशयपुलकानां भरेण प्रकटितरोमांचा
तिशयेन दंतुरितमुन्नतीकृतं तेन कृत्वा तद्दर्शनात् कृष्णकर्तृकरतिकेलिकलाभिः रतिके
लिकलाविर्भावाभिः कृत्वाऽधीरं स्यादुपमर्दाक्तं॥ यद्वा॥ एवंविधपुलकाविर्भावात् रतिके

लिकलान्निर्विनाऽधीरं। ननु पूर्वोक्तिविततबहुवल्लिनवपल्लवघने स्थिरतमःपुंजेनि
कुंजे पुलकादिदर्शनं कथं भवतीत्यत्राह। कीदृशं। मणिगणकिरणसमूहसमुज्वलभू
षणसुभगशरीरं पूर्वोक्तिहारावलीत्यादिमणिगणकिरणसमूहैः समुज्वलभूष
णैः उल्लासुभगं सुंदरशरीरं यस्य तं मणिगणकिरणसमूहसमुज्वलभूषणशरीर
त्वात्पुलकादीनां दर्शनमिति भावः॥ अत्र केलिकलानिरधीरतया शीर्य्यमाणसीघमा
नत्वाच्छरीरपदप्रयोग उक्तः॥ एवंविधमकरसं हरिं सा ददर्शेत्यर्थः॥ ॥एवंविधश्रीज
यदेवेन भणितमित्याह॥ ॥श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं॥ प्रण
मत हृदि विनिधाय हरिं सुकृतोदयसारं॥ हरिण॥ ॥श्रीजयदेवभणितविभवात्॥
द्विगुणकृतः भूषणानां समूहो यत्र तं॥ यद्वा॥ जयदेवभणितमेव विभवस्तेन द्विगुणी
कृतः॥ यैर्भूषणैः स्वलंकृतस्ते लंकाराः जयदेवभणितस्योपमारूपवाग्विलासैर्द्वि

Geeta Govinda
Vallabhacharya Prabodhini

ीत०भाव
२१९

प्रबोधिनी॰

गुलीकृतभूषणभारमित्यर्थः॥ नीलीत्का॥ एवंविधं हरिं सुचिरं हृदि विनिधाय प्रणमत
कीदृशं॥ यद्वा॥ सुचिरं सुकृतोदयसारं। बहुकालपर्यंतकृतपुण्यविशेषातिशयस्य
उदयस्तस्य सारं सारभूतं फलमित्यर्थः। यद्वा। एवंविधमेकरसं हरिं दृष्ट्वा सरसः पर
स्परमाकूतः हेतुरसः सर्वा ईदृशं हरिं हृदि विनिधाय प्रणमत कथंभूतं किं विरहकृशि
तां श्रीराधां वसंते वासंतीत्यारभ्य किं ते कृतांतभगिनीत्यादिपर्यंतं व्याकुलीभूतां दृष्ट्वा।
जीवनं कृतः स्थितमतो हर्षांगगमनाङ्गीवनं सर्वासां जातमतः सुचिरं सुकृतोदयसाररू
पं हरिं प्रणमतेति भावः॥ एवं श्रीजयदेवेन भणितमित्यर्थः॥ अथैवंविधं श्रीकृष्णस्य।
श्रीराधादर्शनविकारं तं सुक्त्वा श्रीराधायास्तद्दर्शनानंदात्सात्विकाविकारमाह। अ
तिक्रम्यापांगमिति॥ ॥अतिक्रम्यापांगं श्रवणपथपर्यंतगमनप्रयासेनैवाक्ष्णोस्त
रलतरभावं पतितयोः॥ इदानीं राधायाः प्रियतमसमालोकसमये पपातस्वेदांबुप्रक

२१९

रङ्गवद्धर्षाश्रुनिकरः॥ ॥१९॥ ॥प्रियतमसमालोकसमयेतदानींश्रीराधायाःअक्ष्णोर्हर्षा
श्रुनिकरःपपातयदासादृशमेकरसंददर्श।तदानींप्रियतमश्रीकृष्णावलोकनसमयेश्री
राधायाआराध्यसंलिप्सुरूपायाअपिनेत्रद्वयसकाशात्हर्षजाताश्रुसमूहःपपात।साकि
काविनिर्गताश्रुप्रलयःउत्सेदान्तेस्वेदाम्भःस्मरङ्गवाकीदृशयोरक्ष्णोःतरलतरतारंपतितयो
ःअतिशयेनतरलस्तरलतरःतरलतरतारंअतिचंचलनेत्रकनीनिकायत्रतत्॥यथा।
स्यात्तथाक्षिप्तियंदेशांतरंगतमागतंप्रकाशातिसत्वरंदर्शनार्थंधावमानासतिपततितथा·
बहुकालपर्यंतमूर्वीविप्रवृद्धंप्राणप्रियदर्शनंविनास्थितयोस्समागतमत्यासांदर्शनार्थंत
रलतरतयागमनोत्थम्पतिततयोरुत्कण्ठानुरक्तेजाते।अत्रपुलकोद्धाउत्सेदरुतेम्प्रतिक्रम्यापां
गश्रवणपथपर्यंतगमनप्रयासेनेवाअपांगमतिक्रम्यातिक्रम्यापांगंनेत्रयोरतिक्रम्यश्र
वणपथपर्यंतगमन[illegible]श्रमातिशयेनेवायःकश्चिद्दीर्घंधावतिमर्यादातिक्रम्यगच्छवि

।सश्रमातिशयात्।हा।पतत्येवपतनश्रमान्यांस्वेदांभःप्रसरेणैवेदितिभावः।ततत्राय्यांतंग
तायाःश्रीराधायाःप्रियदर्शनावेशेनलज्जाविजितेत्याह।भजंत्यास्तल्पांतमिति।।भजंत्या
स्तल्पांतंकृतकपटकंडूतिपिहितस्मितंयातेगेहाद्बहिरवहितालीपरिजनेप्रिया
स्यंपश्यंत्याःस्मरशरसमाकूतसुभगंस। लज्जायालज्जातागमदिवदूरंमृगदृशः।।२।।
तत्सुखानुकूल्येऽवहितःसावधानोयत्रालीपरिजनस्तस्मिन्कृततयाकपटकर्णादिकंडू
[illegible] त्यापिहितमाच्छादितंस्मितंयथास्यात्तथाकुंजगृहाद्बहिर्यातिसे
तितयोःसुखानुकूल्यंदृष्ट्वालीपरिजनसमाजसंकोचभावंज्ञात्वासावधानःसखीप
रिजनः।सस्मितोजातस्तस्मिन्नाचरणंकर्णादिकंडूयनादिनाकृत्वाकुंजाद्बहिर्निर्गतेस
तिमृगीदृशःश्रीराधायाःलज्जापिसलज्जांलज्जांप्राप्यापिदूरंविशेषेणगमत्।मृगी
दृशः।सर्वोत्कसुदिष्टमनुनयेन।क्षीणचित्वायामृगान्हीतस्यालज्जा।त्वदालोकः३।

ज

कादपि किमपिंज्ञांजनयती स्फस्फुत्वा सा लज्जाढ्यं व्यगमत् । नोचेत्स्वा नामा चिकीत्पागेयेव
वर्त्तमाणगतवत्ति सखीहृदंदेमंदन्नपानरनि मिरेत्फस्फकत्वान्निर्द्धिर्जाच ऊलांगनेत्फस्केष्व
तऊस्कौ विरोधापत्तिः स्यादतः सागता । अत एव सलज्जात्वमुक्तं । नगवद्दोषदर्शनाद्व ।
जं साप्यहंरे खुनरागमनेन स्यात्तथा व्यगमत् । इति भावः । कीदृशंपाम्नगीहृशा ॥ तल्पा
तेन्नजं सा: शय्यासमीपंगतायाः ॥ आलीपरजनः ॥ लज्जापि वहिर्यातिसति । संकोचाभावात्त
ल्पांतेन्नजं सा: खुनः कीदृशा: स्मरस्वरस्समाकृतवसुनगंप्रियास्पंपशंपल्पा: स्मरेणसम्पक
आकृतमाविर्न्हेतंहास्पकदाद्यादिकं तेन सुनगं सुंदरं यथास्पास्तथा । यद्वा । प्रियस्पा
विशेषणं । स्मरसंशरसमाकृतसुनगंप्रियास्पंपशंपस्पा: । अथ पूर्वोक्तिबाऊर्गपितनो
स्तनो सुनवत: श्रेयासीत्यादिना सख्याप्रार्थितसत्यवचनकरदानाद्दहामिंहनिवसा
मियादिराधसमनुनयमधुवनेनचानयेयाः साचेन्नागमिष्यतितदाचकारादद्दमाग

Geeta Govinda
Vallabhacharya
Bhava Prabodhini

मिष्यामीतितद्वचनसत्यकरणादागतस्य भगवतो भुजदंडं कविः सखीभावं प्राप्तः सन् स्तौती
त्यत्राह॥ ॥जयश्रीविन्यस्तैरिति॥ ॥जयश्रीविन्यस्तैर्नवचवरमंदारकुसुमैः स्वयं सिंदूरेण द्वि
परदमुदा मुद्रित इव॥ भुजापीडक्रीडाहतकुवलयापीडकरिणः प्रकीर्णासृग्बिंदुर्जयति
भुजदंडो मुरजितः॥ १॥ मुरजितः भुजदंडो जयति॥ पूर्वोक्तमुरदैत्यजयकरणान्मुरजित्तस्या
धुनाप्यजेयमानं दूराकृतमित्याशयेन मुरजितश्चोक्तिः॥ मोरयतीति मुरः मुरावर्त्तने॥ आव
र्त्तनि वैमुख्यकरणान्मानस्य मुरत्वं तं जयतीति तथा मुरजित इत्यर्थः॥ यद्वा॥ पूर्वोक्तकुवलया
पीडिनसार्द्धं रणे राधापानपबोधस्मरणात्तत्कुंभेन सैमेदवान्॥ तत्स्मरणात्सात्त्विकावि
र्भावाद्यत्र स्विद्यतीत्यादि श्रुत्वा राधायाः मनसि वैराग्यस्थित्वमासीत्तत्त्वेयथा दूराकरणा
र्थं निकुंजवहिः स्थिताः सख्यः भगवद्भुजं स्तुवंति॥ मुरजित्त्वादतिबलिष्ठस्य भुजदंडः की
दृशो भुजदंडः भुजापीडक्रीडाहतकुवलयाहतेपीडकरिणः प्रकीर्णासृक्बिंदुः॥ एवं कु

Geeta Govinda
Bhava Prabodhini

वलयापीडेनभुजेनसुकृतिनापीडितस्तस्यह्रद्रणात्क्रीडायापीडनात्कदाचिद्दुःखंजातंनविघ्न
ति।उक्तःखात्मायक्रीडेत्युक्तं।तयाक्रीडयाहतस्यकुवलयापीडकारिणःप्रकीर्णाः।विन्दिश्चाल
य्याअसृतःरुधिरस्याबिंदवोयत्रसः।पुनःकीदृशःउत्प्रेक्षतेजयश्रीविन्यस्तैर्मंदारकुसुमैर्म
हितइवकुवलयापीडहननरूपिण्याजयश्रियाविन्यस्तैरोपितैर्मंदाराख्यैर्द्देवद्रुमकुसु
मैर्महितःपूजितइव।जयश्रियापूजितत्वेहेतुराह।[illegible]।उत्प्रेक्षतेस्वयंसिंदूरेण।
द्विपरणमुदामुद्रितइव।द्विपरणजयमुदाहर्षेणस्वयंमुद्रितइव।अग्रेमुद्धसन्मुखरणा
न्निगमनेपिजयोनविघ्नतीतितात्पर्येणजयश्रिया।सिंदूरेणयथामल्लरणान्निमुखंयाति
तदासरुणेनरागेणांकंमुद्रयतीतिरंजयतीतिप्रसिद्धेस्तथेतिभावः।।भुजस्यदंडोरूपाकृताप
राधस्यशासितःदंडकरणात्भुजस्यदंडत्वमितिज्ञापितं।।एवंविधोयोमुरजित्तस्यभुजदंडोज
यतीत्याशीः।।जयतीनिर्वर्तमानप्रयोगेणसर्वदाएवंविधोभवतीतिज्ञापितं।। ।।इतिश्रीगी

Geeta Govinda
Bhava Prabodhini

तगोविंदेश्रीजयदेवकृतेभावप्रबोधिन्यांसानंदगोविंदोनामएकादशःसर्गः॥ ॥११॥ ॥एवंश्री
राधांप्राप्यानंदसहितोगोविंदोजातत्वात्सानंदगोविंदः।अथगीतछद्मेनान्त्यंसर्गोयंद्वादशःश्रु
तः॥श्रीराधामाधवयोःक्रीडासर्गेस्मिन्प्रोच्यतेस्फुटं॥अथतांतल्पांतंव्रजंतीमालक्ष्यस्मरश
रसमाकुलंअनंगप्रियतमंपश्यंतीवास्यश्रीकृष्णोतिदैन्यमाविःकुर्वंस्तामुवाचेत्यत्राह॥
गतवतीति॥ ॥गतवतीसखिवृंदेमंदत्रपाभरनिर्भरंस्मरपरवशाकूतस्फीतस्मितस्नपि।
ताधरं।सरसमनसंयथास्यात्तथादृष्टांदृष्ट्वा।कीदृशींप्रियां।मंदत्रपाभरनिर्भरस्मरप
रवशाकूतस्फीतस्मितस्नपिताधरां।यतिलज्जाऽऽरंभगमात्स्वाभाविकाकूतश्रियामु
चितायामंदत्रपातथालज्जातिशयेननिर्भरस्मरपरवशोयाआकूतोऽभिप्रायस्तेनस्फीतामुक्त
:किंचिद्धासस्तेनस्नापितःकंपयुक्तोधरोयस्यास्तांतत्सामयिकाकिंचित्कथनार्थमभिप्राययु
क्तंकिंचित्कथनार्थमुद्युक्तामपिमंदत्रपावशान्नोच्यते॥तेनकृतास्फीतस्मितस्नपिताधरा

मितिभावः॥ पुनः किंभुतं केलिनवपल्लवसरशायने विद्धि ताद्दीयद्दक्कमुद्यतामं दत्रपात्र
रान्नोच्यते तदनिशायंशालाहरिस्तां किमुवाचेत्याह॥ ॥अनुगतमिति॥ ॥अनुगत।
स्याराधकस्यानुसरणं युक्तमिति साधारणस्याराधकस्यानुसर[illegible]णी। नोचित।
मितितत्राह॥ नारायणं नराणां समूहो नारः॥ नारस्यायनं नारायणमीश्वरं॥ इतिचेत्स
मीश्वरः। मनुष्याहं तदाप्यनुचितं ययोरेवसमंकुलमिति वाक्यात्तत्राह। त्वं राधिके। त्वम
पीश्वरी आराध्यत्वात्। कथमाराध्यासीसिद्धिरूपत्वात्॥ त्वत्साह्यर्थंतपस्वीकरणान्नारायण
मधुनाहृर्णं[illegible]शायः॥ सीसिद्धिः क्वचित्वासास्ति कदा किं तपः कृतमिति चेत्स्वयं
त्रसमं त्वयारतिपतेरासादिताः सिद्धयः॥ तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनराविर्भवः॥ ध्या
यं त्वामनिशं जपन्तवैवालापमंत्रावलीमिति त्वां प्रतिसरयुक्तत्वात्तथेतिभावः॥ यद्वा॥ नाराणी
समूहो नारस्तस्याघनमाश्रय इतिचेत्तथापि त्वामाधाय हृदये तत्समूहं तत्पस्को त्वामनुगतरल

दिकनिष्ठस्त्वंमांनारायणंकृष्णमधुनानुसर।अनुसृतास्मिकथमनुसरामीत्यत्राह॥किंश
लयशयनतले हे कामिनिचरणकमलविनिवेशंकुरु।आराधागमनस्यपूजोचितत्वात्तथ
मासनंकुरु तंकिंशलयतलंतल्पंतदंगीकुर्वित्यर्थः॥कथमाराध्यायतःकामिनीकामिनंपति
कामियतिवांछितंवाईयतेप्राप्यतेसाकामिनीतत्संबोधनंकामिनि।अभिलाषवंतंतत्या।
भिकारिके।एवंविधात्वंअस्मिंश्चरणकमलनिवेशोकिंस्यात्तत्राह॥त्वदपदपल्लववैरिपराभ
वमिति।इदंकिंशलयशयनतलंतवपदपल्लवैरि।अतस्तत्पराभवंअनुभवतुतवपदपल्ल
वमरुणादिगुणयुक्तं।इदमपिकिंशलयशयनतलंतथालावण्यसाम्यस्पर्धित्वाद्वैरीतस्यप
राभवस्तवचरणकमलनिवेशनेनकृत्वाजयमनुभवत्वित्यर्थः।कीदृशमिदंसुवेशंसुष्ठु
वेशायस्पततर।तद्गुणेशेननमिति॥आसनानंतरपूजामाह॥ ॥करकमलेनेति॥ ॥कर
कमलेनकरोमि।चरणमहमागमितासिविदूरं।क्षणमुपकुरुशयनोपरिमामिवनूपुर·

मनुगतशूरं॥ क्षणम॥ २॥ ॥ हे कामिनी विदूरमागतासि। विशेषेण दूरमागमितासि। आनीतासि। दूरमागतस्य पदरुजादुःखैर्वर्तितः करकमलेनाहं चरणं करोमि। रुजानुभ्यादिनान्नवत्पन्नः करस्वरूपेण कमलेन तच्चरणकमलरुजासा प्रतिरुजां यथायोग्यामेव दत्तश्चरणकमलस्य करकमलेन रुजां करोमि। अर्थश्चिरसंवाहनमित्यभिप्रायः। अतः क्षणं शयनोपरि नूपुरमिव मामुपकुरु। अंगीकुरु। यथा नूपुरं चरणावलितं लग्नं भवति तथा करकमलाग्नं कृत्वा यत्र नूपुरं तिष्ठति। तथाहं कमलेन नूपुरमिवागमनयनार्थे संवाहयामीति भावः। यद्वा। एवं यथा भगवतः पादसंवाहनं कृतं श्रियया संस्पर्शनेनांकगतांघ्रिहस्तयोस्तथा विकीर्तेः। ये यथा मां प्रपद्यंते इति प्रतिज्ञात्वात्फरूपोऽहमस्वरूपेण स्वश्रियत्वा सानकाराविष्यतीति अभिप्रायेणाधुना नारायणमित्यभिप्रायः। कीदृशं। अनुगतशूरं। अनुगतेः निपुणं। अनुगतस्य पादलग्नमुपचारं चरणं दृढमेव॥ यद्वा। सर्वे वक्ति कीर्त्तेदासस्यैवोपसे

Geeta Govinda
Bhava Prabodhini

वितपदांभोजेकृतःसंभ्रमइत्यर्थःकृत्वाचतत्करणंशक्यमेवेतिभावः॥उक्तंचेत्कथंनकरो
षिअतआज्ञांप्रार्थयतेतत्राह।वदनसुधानिधिगलितमिति॥ ॥वदनसुधानिधिगलित
ममृतमिवरचयवचनमनुकूलं।विरहमिवापनयामिपयोधररोधकमुरसिदुकूलं॥
क्षणण॥३॥ ॥अतोअनुकूलममृतमिववचनंरचय।लजांऊर्वितिपकूलेमृतंवचनंरच
य।कीदृशं।वचनामृतं।वदनसुधानिधिगलितं।अमृतमिंदोःसकाशाद्गलितंभवति।इ
दंवचनामृतंत्वत्स्पेदितंतेवदनसुधानिधेःसकाशाद्गलितमिव।तववदनमेवसुधानिधिश्चं
द्रस्तत्सकाशाद्गलितत्वादमृतमिवेत्यर्थः॥अन्यदपिप्रार्थयते।उरसिदुकूलंअपनया
मि॥उरसिस्थितंदुकूलंदूरीकरोमि।कीदृशं।पयोधररोधकं।पयोधरयोःरोधयति।
तत्किमिव।विरहमिव।यथाविरहेपयोधरविच्छेदस्तथानेनदुकूलेनेतिभावः॥ननुलज्जा
जा गतलज्ज्यायांवस्त्रादिकंपरिधाप्यते।अतस्तुनत्वंदुकूलमपनयसीत्यत्राह।प्रियपरिरंभणे

Geeta Govinda
Bhava Prabodhini

ति॥ ॥प्रियपरिरंभणरभसवलितमिव पुलकितमतिदुरवापं। मदुरसि कुचकलशं विनिवे
शय शोषय मनसिजतापं।कृष्ण॥ध्रु॥ ॥प्रथमतस्तत्परिधत्तं दूरीकृत्वा मत्परिधाप्यते तथा
हे प्रिये मदुरसि कुचकलशं विनिवेशय॥ तदुक्तं दूरीकरणादनावृतं कुचकमलशं ज्ञा
त्वा। मदुरसि रूपावरते॥ कुचक[illegible]लशं विशेषेण निवेशय। यतः कीदृशं॥ उत्प्रेक्षते प्रियपरि
रंभणरभसवलितमिव। प्रियस्य मम परिरंभणाय प्रेमातिशयेनोत्कंठीतास्ति उत्कमिव
तत्कुतोवगतं। यतः पुलकितं पुलकं विलस्पसा लिका चिन्हं वा तत्फलकादिकं नवलतोव
गतं। नन्वेवं पुलकं विलिंगेन तदा स्वयमेव निवेशनं करिष्यति कथं प्रार्थयसे तत्राह। कीदृशं। उ
नः किं दुरवापं। दुःप्रापं। प्रार्थितमपि न प्राप्यते। तदा प्रार्थितं कृतः प्राप्यते। एवं विधम
पि त्वदुरसि निवेशने किं स्यात्तत्राह। शोषय मनसिजतापं। नानायमाधीवा। मनसिज
तापं शोषय। रसायनकलशरूपेण त्वा तापरशं निर्वर्तयेवातः कलशो रूपा यथा जल

पूरितस्तथायमपि स्नेहरसेन पूरितस्तापशांतिं करिष्यतीति भावः॥ नाशादिपदंतत्कोशो।
षणपदोक्त्या शोषणमाहु द्रवस्य स्यादयं तापो मनसिजाग्निना जातत्वात्। यथाग्निना दग्धस्या
ग्निस्वेदात्तापशोषणं जायते तथायं मनसिजतापः। विप्रयोगशृंगाररसरूपत्वात्तवापि नत्वा
प्रयुक्तं औषधं शा यथा ज्वरादिकृततापः। बहिरुपचाराच्छांतो न भवति बाह्यः। नदीपते। अ
यं तु मनसिजत्वादंतः रसप्रयोगं विना तदांतर मुरस्मितिवेशनेन मनसिजजाततापशोषण
मुभयोर्न विष्यतीति यद्वा आशामयेति पाठे वा भावः। शोषणेत्यापिज्ञापितमिति। अन्नभाव
प्राप्त्या। प्राप्त्याशायावलंबेन जीवनं भवति। विद्यमानेन्नेतन्न प्राप्यते तदा जीवनेन भवत्येव·
तथैतावत्कालपर्यंतं संगमाशायावलंबेन जीवनं जातं संयोगे जाते न प्राप्यते तदा जीवनं न भ
वत्येव तथैतावत्कालपर्यंतं संगमाशायो दशमी दशा वै स्यादित्याह॥ ॥अधरसुधेति॥ ॥
अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासीं॥ त्वयि विनिहितमनसीं विरहानल

एवपुषमिवविलासं। ध्रु०॥५॥ अतो हे भामिनी। अधरसुधारसमुपनय। अधरए
वसुधारसंतमुपसमीपंनयप्रापय। ननु चागत्य कथं न गृह्यते। उपनयनं कथं प्रार्थ्यते त
दाह॥ जीवय मृतमिवदासं। मृतमिव मृतप्रायं दासं जीवय मामिलर्षीत इयं। मृतप्रा
यत्वादागत्य ग्रहणाशक्त्या नावाउपनयेत्युक्तं। अमृतंदत्वा मृतंजीवय अतोधरसुधैव
रसो मरणनिवर्त्तकः॥ अधरसुधाया रसोत्कृपारसः संयोगरसः नोचेत्संयोगस्तुवर्त्ते
त एवातोधरसुधैव संयोगरसस्तं विना न संयोगो न जीवनं अतो मृतमिव। किंच। मन
एव मनुष्याणां कारणं बधमोक्षयोरिति वा। कीदृशं। त्वयि विनिहितमनसं। त्वय्ये
व विशेषेण निहितं मनो येन तं यस्य वा तं॥ मनो विनापि मृतमिवातोधरसुधारसमुप
नीय मृतमिवदासं पूर्वोक्तश्रुतेरुपलक्ष्मीलवक्रीतेदासइवेत्युक्तत्वात्तथाविधदा
सीं विना स्वामिनः कार्यसिद्धिर्न स्यादतो जीवयेत्यर्थः। ननुते कापी कामनोपकल्प्यते॥

कथमात्मानंमृतंमन्यसेतत्राह॥ पुनःकी॰। विरहानलदग्धवपुषं। विरहएवानलस्तेनदग्धं
वपुर्यस्यतं। अधुनाविरहोनास्तिकथमेवमुच्यतेतत्राह। कीदृशं। अविलासं। नविद्यतेवि
लासोयस्यतं। विलासरहितं। यावद्विलासोनसंपद्यतितावद्विरहानलएव। विगतोर
हएकांतता। विरहएकांतत्वाद्विरहएवतस्मादेवंविधंमृतमिवदासंजीवयेतिभावः।
नन्वहमपितथाविधास्मीतिममाधरेऽमृतंकुतःसुधत्वात्तत्कथंज्ञानमित्यत्राह॥शि
शिमुखीति॥ ।हेशशिमुखीमुखरयमणिरसनागुणमनुगुणकंठनिनादं। श्रुतियुगले
पिकरुतिविकलेममशमयचिरादवसादं। द्रुगण॥२॥ ।हेशशिमुखी॥ ॥शशि
वन्मुखंयस्याः सोमृतमयत्वान्नतथाभावइत्याशयः। अधररसदानानंतरकार्यमा
र्पयति। मणिरसनागुणंमुखरय। कीदृशं। अनुगुणकंठनिनादं। गुणमनुकरोति
णाः अनुगुणाः कंठनिनादोयस्यतं। कंठनिनादानुगुणानुकारीत्यर्थः। एवम